चतुर्थः पाठः

# चत्वारो वेदाः

[भारतवर्षस्य सांस्कृतिकनिधिषु वेदाः प्रधानपदं धारयन्ति। संसारस्य उपलब्धग्रन्थेषु ते एव प्राचीनतमाः सन्ति। भारतीयाः सर्वेऽपि वेदसम्बन्धेन गौरवमनुभवन्ति। ज्ञानस्य पर्याय एव वेदो वर्तते। शास्त्राणि वेदानामुद्धरणैः स्वसिद्धान्तान् प्रतिपादयन्ति। प्रस्तुते पाठे चतुर्णां वेदानां स्वरूपं मुख्यं च प्रतिपाद्यं दर्शितमस्ति।]

अस्माकं प्राचीना संस्कृतिर्वेदेषु सुरक्षिता वर्तते। संसारस्य च प्राचीनतमं साहित्यं वेदेषूपलभ्यते। सप्तसिन्धुप्रदेशे निवसन्तः ऋषयस्तात्कालिकं सर्वं ज्ञानं वेदरूपमधारयन्। विशेषतो यज्ञसंचालनाय एकस्यापि वेदस्य चत्वारि रूपाणि कृतान्यासन्। अतएव चत्वारो वेदाः इति परम्परा प्रवृत्ता। ते च वेदाः ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदश्चेति सन्ति।

ऋग्वेदः प्राचीनतमान् मन्त्रान् धारयति। अतएव इतिहासस्य विद्वांसस्तस्य महत्त्वमतितरां मन्यन्ते। अयं वेदो दशसु मण्डलेषु विभक्तः। प्रतिमण्डलं च ऋक्समूहरूपाणि सूक्तानि बहूनि विद्यन्ते। सूक्तानां देवताः ऋषयः छन्दांसि च पृथक् सन्ति। सम्पूर्णे ऋग्वेदे 1028 सूक्तानि, 10552 ऋचः वर्तन्ते। ऋचः एव मन्त्राः अपि कथ्यन्ते। ऋग्वेदे देवानामावाहनार्थं मन्त्रा इति कर्मकाण्डोपयोगः।

यजुर्वेदः शुक्ल-कृष्णरूपेण द्विविधः। प्रायेण शुक्लयजुर्वेदः एव उत्तरभारते प्रचलितः। तस्मिन् चत्वारिंशदध्यायाः सन्ति। अध्यायेष्वनेके गद्य-पद्यात्मका मन्त्राः सन्ति। तेषु मुख्यतो विविधकर्मसम्पादनाय विधयो दर्शिताः। यजुर्वेदस्य अर्थ एव वर्तते यज्ञवेदः। प्रचलिते शुक्लयजुर्वेदे 1975 मन्त्राः संकलिताः। यज्ञेष्वस्य वेदस्य व्यापकः प्रयोगः।

सामवेदः प्रायेण ऋग्वेदस्य गेयात्मकैर्मन्त्रैः संकलितः। तत्र यज्ञे समाहूतानां देवानां प्रसादनं लक्ष्यमस्ति। प्रसादनं च गानेन भवति। अतएव सामवेदस्य गायकाः उद्गातारः कथ्यन्ते। भारतीयं संगीतं सामवेदादेव प्रारभते। सामवेदे 1875 मन्त्राः सन्ति। सामवेदश्च पूर्वार्चिक-उत्तरार्चिकभागयोः विभक्तः।

अथर्ववेदो लौकिकं वैज्ञानिकं च विषयं विशेषेण धत्ते। अयं विंशतिकाण्डेषु विभक्त:। प्रतिकाण्डं च सूक्तानि वर्तन्ते, सूक्तेषु च ऋग्वेदवत् मन्त्रा: सन्ति। सम्पूर्णेऽथर्ववेदे 730 सूक्तानि, 5987 मन्त्राश्च विद्यन्ते। अत्र द्वादशे काण्डे भूमिसूक्तं वर्तते यत्र मातृभूमे: स्तुतिर्विस्तरेण कृता।

एते सर्वे वेदा: मन्त्राणां संकलनत्वेन संहिता: अपि कथ्यन्ते। तदनन्तरं तद्व्याख्यारूपाणि ब्राह्मणानि बहूनि वर्तन्ते कर्मकाण्डपराणि। दार्शनिकचिन्तनपराणि आरण्यकानि, शुद्धदर्शनपरा: उपनिषदश्च विकसिता:। सर्वेऽप्येते वेदसंहितानां कृते पृथक्-पृथक् सन्ति। अपि च वेदानामङ्ग.रूपेण शिक्षा, कल्प:, व्याकरणं, विनरुक्तं, छन्द:, ज्योतिषं चेति षड्वेदाङ्ग.ानि विपुलं साहित्यं प्रस्तुवन्ति। सर्वमिदं मिलित्वा विशालं वैदिकं साहित्यमिति वर्तते।

## शब्दार्था:

| | | |
|---|---|---|
| **प्रवृत्ता** | प्रारब्धा, प्रचलिता | चल पड़ी, प्रचलित हुई |
| **अतितराम्** | अधिकतरम् | और भी अधिक |
| **आवाहनार्थम्** | आवाहनाय | बुलाने के लिए |
| **कर्मकाण्डम्** | याज्ञिक: क्रियासमूह: | यज्ञकार्य |
| **विधय:** | विधानानि | नियम |
| **गेयात्मकै:** | गानयोग्यै: | गाने के योग्य |
| **प्रसादनम्** | प्रीतिजननम् आराधनम् | प्रसन्न करना |
| **संकलनत्वेन** | संग्रहकारणेन | संग्रह होने के कारण |
| **उपलभ्यते** | प्राप्यते | पाया जाता है |
| **प्रतिपादयन्ति** | वर्णयन्ति | प्रतिपादन करते हैं |
| **प्रारभते** | आरभते | प्रारम्भ होता है |
| **धत्ते** | धारयति | धारण करता है |
| **प्रस्तुवन्ति** | प्रस्तुतं कुर्वन्ति | प्रस्तुत करते हैं |

## व्याकरणम्

### ( क ) सन्धिविच्छेदः

**संस्कृतिर्वेदेषु** – संस्कृतिः + वेदेषु

**ऋषयस्तात्कालिकम्** – ऋषयः + तात्कालिकम्

**कृतान्यासन्** – कृतानि + आसन्

**अथर्ववेदश्चेति** – अथर्ववेदः + च + इति

**देवानामावाहनार्थम्** – देवानाम् + आवाहन + अर्थम्

**चत्वारिंशदध्यायाः** – चत्वारिंशत् + अध्यायाः

**यज्ञेष्वस्य** – यज्ञेषु + अस्य

**गेयात्मकैर्मन्त्रैः** – गेयात्मकैः + मन्त्रैः

**सामवेदादेव** – सामवेदात् + एव

**अध्यायेष्वनेके** – अध्यायेषु + अनेके

### ( ख ) प्रकृति-प्रत्यय विभागः

**उपलभ्यते** – उप + Öलभ् + कर्मवाच्य (य) + लट् लकार

**प्रवृत्ता** – प्र + Öवृत् + क्त + टाप्

**दर्शिता** – Öदृश् + णिच् + क्त + टाप्

**मिलित्वा** – Öमिल् + क्त्वा

**विभक्तः** – वि + Öभज् + क्त

**कृता** – Öकृ + क्त + टाप्

**निवसन्तः** – नि + Öवस् + शतृ

## अभ्यासः (मौखिकः)

1. **उत्तराणि वदत–**

(क) अस्माकं प्राचीना संस्कृतिः कुत्र सुरक्षिता अस्ति?

(ख) वेदाः कति सन्ति?

(ग) ऋग्वेदः कीदृशान् मन्त्रान् धारयति?

(घ) ऋग्वेदे कति सूक्तानि सन्ति?

(ङ) यजुर्वेदे कति अध्यायाः सन्ति?

2. **वेदाङ्ग.ानां नामानि वदत।**

## अभ्यासः (लिखितः)

1. **अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत–**

(क) संसारस्य प्राचीनतमं साहित्यं कुत्र उपलभ्यते?

(ख) ऋग्वेदः कति मण्डलेषु विभक्तः?

(ग) सामवेदः ऋग्वेदस्य कीदृशैः मन्त्रैः संकलितः?

(घ) अथर्ववेदस्य द्वादशे काण्डे कस्याः स्तुतिः?

(ङ) वेदाङ्ग.ानि कति सन्ति?तेषां नामानि लिखत।

Ü. **संस्कृतेऽनुवादं कुरुत–**

(क) वेद चार हैं।

(ख) वेद संसार का सबसे प्राचीन साहित्य है।

(ग) हमारी प्राचीन संस्कृति वेदों में निहित है।

(घ) अथर्ववेद में लौकिक विषय आये हैं।

(ङ) हमें वेद पढ़ना चाहिए।

## योग्यता-विस्तार

वेद भारत के ही नहीं, संपूर्ण विश्व के प्रथम उपलब्ध ग्रन्थ हैं। ये वैदिक भाषा में हैं जो संस्कृत का ही प्राचीन रूप है। चारों वेदों के मन्त्रों का संकलन यज्ञ की दृष्टि से हुआ है। यज्ञ में देवों के आवाहन के मंत्र ऋग्वेद में, यज्ञ के विधि-विधान के मंत्र यजुर्वेद में, देवों को प्रसन्न करने के लिए संगीतमय मंत्र सामवेद में और यज्ञ के विघ्नों के निवारक मंत्र अथर्ववेद में हैं।

वेद को पुरुष का रूप देकर उसके छः प्रमुख अंगों के रूप में छः वेदांग (शास्त्र) बने। शिक्षा (उच्चारण का शास्त्र) नासिका है, कल्प (यज्ञ-विधान का शास्त्र) हाथ है, ज्योतिष (काल ज्ञान का शास्त्र) नेत्र है, निरुक्त (अर्थज्ञान का शास्त्र) कान है, छन्द (पद्यात्मक मंत्रों में चरण-व्यवस्था का शास्त्र) पैर है और व्याकरण (शुद्ध वाणी का शास्त्र) मुख है। इसलिए ये वेदांग (वेद के उपकारक) कहे गये हैं। अङ्ग. उपकारक होते हैं। कहा गया है– साङ्गं. वेदमधीयीत (वेद को अंङ्ग.ों के साथ पढ़ना चाहिए।)